# अभिनवसंस्कृतरूपकम् - पूर्वशाकुन्तलम्

**डॉ. ललितकिशोरशर्मा**
प्राचार्यः, अध्यक्षः - साहित्यविभागः
श्रीदिगम्बरजैनाचार्यसंस्कृतमहाविद्यालयः, जयपुरम् (राजस्थानम्)

पूर्वशाकुन्तलं नामधेयम् अभिनवरूपकं ध्वनिरूपकेष्वन्यतममिति मोदावहो विषयः। रूपकमिदम् अभिनवनाट्याचार्यः डॉ.हरिराम-आचार्यो व्यरीरचदिति। सरलसरसरीत्या अभिनवनाट्यप्रयोगेण रूपकमिदं महता वैशद्येन रचयामास आचार्यप्रवरो हरिरामः। संस्कृतज्ञानां ध्वनिरूपके अभिरुचिः स्यादस्मात् कारणात् रूपकमिदं प्राकाश्यमानीतं वर्तते।

**संस्कृते ध्वनिरूपकम्**

संस्कृते ध्वनिरूपकेषु हम्मीरमर्दनम्, हास्यार्णवप्रहसनम्, जानकीपरिणयम्, आनन्दराघवम्, वासन्तिकस्वप्नम्, लक्ष्मीस्वयंवरम्, दिल्लीसाम्राज्यम्, प्रतापविजयम्, संयोगितास्वयंवरम्, बङ्गीयप्रतापं च अन्यतमानि मुख्यानि नाटकानि सन्ति।

आधुनिकयुगेऽस्मिन् सञ्चारमाध्यमेषु ध्वनिमाध्यमस्य रेडियोयन्त्रस्य आविष्कारेण साकं नाट्येषु अपि अत्यन्तं नवीनो ध्वनिरूपकभेद आविर्भूतः। सञ्चारमाध्यमेषु यथा यथा नूतनक्रान्तिः जाता, तथा तथा सञ्चारजगति सुन्दरतमे नाट्येऽपि नूतना विधाः समयानुरूपसञ्चारसहयोगेन समुपकल्पिताः। दृश्यकाव्यत्वेन प्रसिद्धं चाक्षुषक्रतुरूपेण श्लाघ्यमानं रूपकं श्रव्यकाव्यत्वेन रेडियोमाध्यमेन नवीनेन अवतारेण प्रकटितमभूत्। इतः परं काव्यस्य दृश्यश्रव्यपाठ्यत्वेन त्रयः भेदाः कर्त्तव्याः समपद्यन्त। यदा दूरदर्शनं भारते तावत् प्रसिद्धं नासीत् तदा रेडियोयन्त्रमेव वार्ताः मनोरञ्जकान् कार्यक्रमान् च जनतायाः श्रवणार्थं प्रसारयति स्म प्रसारयति च।

अस्मिन्नेव क्रमे रेडियोतः नाट्यप्रसारणस्य कार्यक्रमा अपि प्रारब्धाः। भरतमुनेः नियमा अपि यथोचितं प्रवर्तिताः। श्रावणप्रत्यक्षमेव रेडियोतः प्रसार्यमाणेषु नाटकेषु जायते इत्यतः तत्र चाक्षुषप्रत्यक्षत्वं न घटते। तत्र शब्दान् ध्वनीन् च आकर्ण्य श्रोता स्वयमेव रूपकस्य श्रावणप्रत्यक्षेण साकं मानसप्रत्यक्षमपि अधिकरोति। इतः परं डॉ.हरिरामाचार्येण उक्तप्रक्रियाम् अनुसृत्य श्रव्यनाट्यानां ध्वनिरूपकाख्यानां विधाविषये तेषु नाट्याङ्गानां समायोजनविषये च कश्चित्

प्रकाशः विधीयते।

**ध्वनिरूपकस्य स्वरूपम्**

संस्कृते प्राचीनेषु नाटकेषु अपि घटनाया अविच्छेदेन प्रतिपादनाय रसस्य अनुभावनाय च अपेक्षितो घटनाविशेषो यदि दर्शयितुं न शक्यते, तदा तत्र अत्याज्यस्य मुख्यभूतस्य परन्तु अदर्शनीयस्य घटनाविशेषस्य तस्य प्रस्तुत्यै प्राचीनैः नाट्यविद्भिः अर्थोपक्षेपकाः कल्पिताः। सूचनीयस्य अर्थस्य केवलं वाचः माध्यमेनैव सूचनं यत्र क्रियते तत्र अर्थोपक्षेपकः भवति। अयं च अर्थोपक्षेपकः विष्कम्भ-प्रवेशक-चूलिका-अङ्कास्य अङ्कावतारभेदैः पञ्चधाः विभक्तः। इत्थं सत्यपि पञ्चषु भेदेषु नाटकीयपात्रद्वारा नेपथ्यवर्तिना पात्रेण वा यत्र अर्थः सूच्यते न तु अभिनयादिना प्रदर्श्यते तत्र अर्थोपक्षेपकः भवति। तत्र नेपथ्यगतैः पात्रैः प्रदीयमाना तत्संवादारूढा सूचना चूलिका भवति। इयञ्च चूलिका अधुना प्रसिद्धया ध्वनिरूपकस्य विधया सामीप्यं भजते। ध्वनिरूपकेऽपि सर्वमपि नाटकीयं प्रमेयम् अचाक्षुषं श्रावणं भवति। अतः ध्वनिरूपकं 'नेपथ्यकथनवाचिकमिति' डॉ.हरिरामाचार्यैः उक्तम्। अस्य च ध्वनिरूपकस्य केचन विशेषाः तैरेव आचार्यैः गणिताः। ते अत्र तथैव प्रस्तूयन्ते।

- रेडियो इति ध्वनियन्त्रमाध्यमेनैव विषयीकर्तुं शक्यं ध्वनिरूपकं रेडियोनाट्यं वा श्रव्यमेव भवति।
- नाट्यस्य अन्यासु विधासु इव ध्वनिरूपकस्य विधायां रङ्गमञ्चस्य अपेक्षा एव नास्ति। अत्र तु स्टूडियो-इत्यस्य एव अपेक्षा वर्तते। रङ्गमञ्चे पात्राणि प्रत्यक्षताम् उपगत्य अभिनयं कुर्वन्ति। ध्वनिरूपके तथा कर्तुमेव न शक्यते। अत्र तु स्टूडियोकक्षे वाचा-अभिनीतस्य ध्वन्यङ्कनयन्त्रैः समारक्षितस्य नाट्यस्य यद्रूपं तत् प्रसारणयन्त्रैः प्रसार्यते रेडियोयन्त्रेण गृह्यते श्रोतृभिश्च श्रूयते।
- ध्वनिरूपके मञ्चस्य अभावाद् मञ्चसज्जायाः पात्राणां दर्शनाभावात् रूपसज्जाया वस्त्रसज्जायाश्च आवश्यकता नास्ति। काव्यस्य कथोपकथनरूपेण लिखितस्य वाचा एव प्रस्तुतीकरणम् अत्र क्रियते।
- वाचिकाभिनयो वाक्प्रधानो भवति। तत्र पात्रानुसारिणी भाषा प्रयुज्यते। भाषाया उद्गारो न केवलम् अभिनेतुः उच्चारणसौष्ठवसहित एव स्यात् अपितु अभिनीयमानस्य पात्रस्य स्वरूपं चरित्रं भावश्च पटुतया स अभिव्यञ्जयितुं क्षमेत।
- ध्वनिरूपके दृश्यपरिवर्तनस्य पटपरिवर्तनस्य वा पटाक्षेपस्य जवनिकापातस्य वा आवश्यकता नास्ति। सङ्गीतमाध्यमेनैव दृश्यपरिवर्तनं तत्र विज्ञाप्यते।

- अभिनीयमानं दृश्यं रसाभिव्यञ्जकं कथ्यमानः संवादः प्रभावशाली घटनां भावं रसं च अनुगतः स्यात् इत्येतदर्थं ध्वनिरूपके सङ्गीतस्य अपेक्षा नाटकस्य विधान्तरापेक्षया अधिका। शोकसूचकं हर्षसूचकं हास्यसूचकं भिन्न-भिन्नं सङ्गीतकम् अवसरमनुसृत्य प्रयुज्यते।
- पृष्ठध्वनिः ध्वनिरूपकस्य स्वरूपघटकं तत्त्वं भवति। विना पृष्ठध्वनिं ध्वनिरूपकस्य कल्पना एव नैव कर्तुं शक्या। तत्र पवनवेगः, रेलयानादिध्वनिः, मेघगर्जनम्, अश्वखुरध्वनिः, जनकोलाहलः, शिशुरोदनम्, विस्फोटः, भाण्डपतनम्, कलरवः, तूर्यनादः, विगुलवादनम्, नूपुरझङ्कारः, श्वमार्जारादिक्रन्दनम् इत्येतानि सर्वाणि पृष्ठध्वनिमाध्यमेनैव संसूच्यन्ते।
- रङ्गमञ्चस्य परिधौ अभिनयार्थं नियतस्य स्थानस्य नियतस्य समयस्य नियतानां क्रियाणां च यो अन्वयो भवति, तस्य अपेक्षा ध्वनिरूपके नास्ति।
- डॉ.हरिरामाचार्यवर्यैः अनुल्लिखितः, अपरो विशेषो यद् ध्वनिरूपकम् एकस्मिन्नेव समये अनेकत्र विद्यमानैः रसिकैः आस्वादयितुं क्षमं भवति। अत्र गृहं परित्यज्य रङ्गमञ्चादिकं प्रति गमनस्य आवश्यकता सर्वथा नास्ति।
- ध्वनिरूपके अनेकपात्रापेक्षिणः अपि नाट्यस्य अनेकविधं भाषितुं क्षमेण एकेनैव पात्रेण अभिनयं कर्तुं शक्यते। यच्च नाटकस्य इतरासु विधासु असम्भवी।
- एकवारं कृतेनैव अभिनयेन अनेकवारं सहृदया आराध्यन्ते। अत्र अभिनयसमकालमेव नाट्यानुभवं कर्तुं प्रायः न शक्यते।
- अनेककारणवशात् गृहात् बहिर्गन्तुम् अशक्ता अपि रसिकाः जनाः गृहकर्माणि कुर्वन्तः एव गृहे स्थित्वा ध्वनिरूपकम् आस्वादयितुं शक्नुवन्ति।
- ध्वनिरूपके पात्राणां वयोनुरूपं स्वरूपानुरूपं च अभिनेतृणाम् अपि वयः स्वरूपं च अनपेक्षितं भवति। स्वरेणैव तत्कार्यम् अत्र सम्पाद्यते।

इत्थम् इदं ध्वनिरूपकं केवलं श्रवणयोः अमृतं सिञ्चत् रेडियोमाध्यमेनैव श्रोतुं शक्यम्।

**नामकरणम्**

अत्र भारतनिर्मातुः भरतस्य जनन्याः उत्पत्तिकथा वर्ण्यते। तदुक्तं नेपथ्यकथने ग्रन्थकृता एव 'सा एव शकुन्तला भारतस्य निर्मातुः सर्वदमनस्य दौष्यन्तेः भरतस्य जननीभूता इति पूर्वशाकुन्तलस्य कथानक' मिति।

**उपजीव्यता**

कविवरस्य डॉ.हरिराम-आचार्यस्य कृतिषु पूर्वशाकुन्तलम् अन्यतमम् । इयं कृतिः न स्वतन्त्रा परन्तु पूर्वम् एभिः आकाशवाणीतः प्रसारणार्थं विरचितानां ध्वनिरूपकाणां सङ्कलनरूपा एव। अर्थात् आकाशवाणीतः प्रसारणार्थं लिखितं तथापि तद्रूपकम् एकाङ्कनाटकशैल्या मञ्चेऽपि अभिनीतम्।

रूपकमिदं प्रायो मिश्रकोटौ अन्तर्भवति। यद्यपि कविः इतिहासप्रसिद्धानि पात्राण्यपि स्वकीये रूपके योजयति तथापि प्रायः कथाचक्रं कथोपकथनादिकं कवेः मौलिकमेव। एतद् रूपकम् अभिनवविधानेन रचितम् । अत्र रूपके प्रयुक्तस्य नाट्यविधेः उल्लेखः स्वरूपं लक्षणं वा नाट्यशास्त्रे तत्प्रकरणभूतेषु इतरेषु अपि ग्रन्थेषु नास्ति। अत्र च कारणम् आकाशवाणीतः अस्य रूपकस्य प्रसारणम् अधुनातनस्य एव युगस्य परिणामः। अतः अत्र प्रयुज्यमानाः विधयः आकाशवाणीद्वारा प्रसारणे अनुकूलया शैल्या पुराकाले अप्रयुक्तया एव भवन्ति। अस्य ध्वनिरूपकस्य प्रसिद्धं नाम रेडियोनाटकम् इति। नाटकस्यास्य नाटकीयनिर्देशः अपि ध्वनिमाध्यमेनैव क्रियन्ते। पार्श्विकं सङ्गीतं ध्वनिभावाश्च संवादानुसारिणः सन्तः नाट्यनिर्देशानां न्यूनतां पूरयन्ति। अत्र वाचिकाभिनय एव प्रधानो भवति। येनैव अभिनयस्य अन्ये अपि विधयः प्रकट्यन्ते। अस्मिन् सन्दर्भे ग्रन्थकर्तुः डॉ.हरिरामाचार्यस्य इमे शब्दाः सन्ति - **'यत्र तत्र आवश्यकतानुसारं स्वप्नशैली, अनुगुञ्जनम्, विगताख्यानम्, मौनम्, घटनावली(मोन्ताज), वाचकप्रयोगः इति विविधानां रेडियोनाटकशिल्पानां प्रयोगः प्रभावान्वितिसंयोजनाय क्रियते'** [1] इति।

**पूर्वशाकुन्तलम्**

अभिज्ञानशाकुन्तलमिति नाटकं महाकविकालिदासविरचितं विश्वप्रसिद्धं वर्तते। तत्र शकुन्तलाया युवत्याः कथानकं कविना वर्णितम्। अभिज्ञानशाकुन्तले वर्णितात् शकुन्तलायाः चरितात् पूर्वतनं भागं स्वीकृत्य कविः अत्र नाटकस्य पीठिकां निर्माति। अत्र विद्यमानं कथानकं पद्मपुराणे महाभारते च विद्यते। विश्वामित्रस्य जीवनस्य कतिपये अंशाः श्रीमद्वाल्मीकीरामायणेऽपि सन्ति।

**प्रमुखपात्रपरिचयः**

| | | | |
|---|---|---|---|
| **इन्द्रः** | - मेनकायाः प्रभुः | **पवनः** | - इन्द्रस्य सहायकः |
| **मेनका** | - नायिका | **विश्वामित्रः** | - ऋषिः, नायकः |
| **माधवः** | - वसन्तर्तुः | **कामदेवः** | - मेनकायाः सहायकः, इन्द्रपरिचरः |

**माधविका** - मेनकासखी **कण्वः** - शकुन्तलायाः पोषकः ऋषिः

**शार्ङ्गरवः** - कण्वपुत्रः

अभिज्ञानशाकुन्तले नायको दुष्यन्तो नायिका च शकुन्तला, परन्तु पूर्वशाकुन्तले नायकः राजर्षिः विश्वामित्रः नायिका च देवाङ्गना मेनका। अत्र नायकः धीरोद्धतस्य गुणैः युक्तः अपि ब्राह्मणत्वात् धीरशान्तकोटौ निवेशयितुमर्होऽपि धीरोदात्तः एव पर्यन्ततः तस्य स्वभावादिसमालोचने प्रतीयते।

विश्वामित्रः तपोधनः महर्षिः कुशिकानां कुले जातः। अयं दृढसङ्कल्पः सुखभोगिनां वृथाभिमानिनां देवानाम् आतङ्ककरः हठी आश्चर्यचेष्टितः नियमातिक्रामी च कविना वर्णितः। विश्वामित्रस्य नाम श्रुत्वैव देवराजः इन्द्रः भीतो भवति। पवनः तं विश्वामित्रं -

**शौचार्थं यो नदीं चक्रे दुर्गमां बहुभिर्जलैः।**

**यां तां पुण्यतमां लोके कौशिकीति विदुर्जनाः॥** [2]

इति नदीकर्तृत्वेन तं स्मरति इन्द्रश्च तं बलेन प्राप्तं ब्राह्मणभावं स्मरति। उक्तं हि -

**महाभागं वसिष्ठं यः पुत्रैरिष्टैर्व्ययोजयत्।**

**क्षत्रजातश्च यः पूर्वमभवद् ब्राह्मणो बलात्॥** [3]

इत्थं गुरुशापेन नष्टश्रियः त्रिशङ्कोः नक्षत्रसम्पदाशरणं दत्त्वा विश्वामित्रः लोके ख्यातकीर्तिः जातः। अपि च मतङ्गं याजयित्वा सः स्वकीयमन्तःकरणमेव धर्माधर्मयोः प्रमाणं मेने। विश्वामित्रः गम्भीरः दृढव्रतश्च ज्ञायते। अत एव तं तपसः निवर्तयितुं देवाः बहूनुपायान् चिन्तयन्ति। इतश्च विश्वामित्रः तपसः च्युतेः अभितः सन् इन्द्रस्य कुटिलं यन्त्रं विदन्नपि पराधीनां शरणागतां मेनकाम् अङ्गीकृत्य तां स्वप्रणयेन वशीकरोति च। तस्याः गर्भधारणचिह्नेन तां सगर्भां ज्ञात्वा पुनः विच्छिन्नमोहपाशः यथायथं तपश्चरणार्थम् एकाकी मेनकाम् असूचयित्वैव वनं गच्छति।

इत्थं विश्वामित्रः अत्र दृढः व्यक्ताहङ्कारोऽपि छलमायादिविरोधी कठोरसङ्कल्पः कठोरव्रतश्च धीरोदात्त एव नायकः गणयितुं शक्यः।

मेनका अत्र पूर्वशाकुन्तले नायिका सा दिव्या नायिका अस्ति। एषा देवराजस्य वाराङ्गनासु ललामभूता इति स्वयम् इन्द्रः कथयति। विश्वामित्रस्य तपोभङ्गाय बलवत्तरप्रलोभनरूपेण मेनका चित्रिता।

अत्र उक्तं पवनेन विश्वामित्रसदृशस्य दृढसङ्कल्पधनस्य महर्षेः तपोभङ्गाय प्रलोभनमपि बलवत्तरमपेक्ष्यते इति। इन्द्रश्च अप्सरसां ललामभूता मेनका अत्र अपेक्ष्यते इति मेनकां वर्णयति। पुनश्च -

**गुणैरप्सरसां दिव्यैः मेनके त्वं विशिष्यसे।**

**श्रेयो मे कुरु कल्याणि यत् त्वां वक्ष्यामि तत् शृणु॥**

इति मेनकां स्तौति च। मेनका इत्थं परमसुन्दरी अपि सौन्दर्यमदरहिता कर्तव्यस्य कर्मणः कठोरतां गम्भीरतां च विदन्ती कृत्यस्य साफल्याय उपायान्तराण्यपि सहायान्तराणीव देवराजं याचते। सा विश्वामित्रस्य तपसस्तेजः सम्यक्जानाति। तत्र विश्वामित्रेण इन्द्रप्रेषितः आत्माज्ञातः इति जानन्ती सद्य एव क्षमायाचनां करोति। इत्थम् आतङ्कमय्यामपि अवस्थायां कर्त्तव्यात् अस्खलन्ती साम्ना शरणवरणेन च ऋषिम् अनुकूलयितुं यतते। तत्र सफला च भवति। तत्र वदति सा क्षम्यतां ममापराधः अहम् नारी समर्पितभावेन आत्मानं निवेदयन्ती अभीप्सितार्थसिद्धिं कामये इति।

इत्थं छलकर्मणि नियुक्ताऽपि निश्छला पवित्रहृदया स्पष्टवाक् मेनका प्रगल्भाकोटौ अन्तर्भवति। प्रगल्भायाश्च लक्षणमिदं -

**स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।**

**भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायिका ॥**[4]

तत्र वस्तु किञ्चिद्विलक्षणं विद्यते। आधिकारिकं प्रासङ्गिकमिति वस्तु द्विविधं भवति। अधिकारिणा निर्वर्ण्यं वस्तु आधिकारिकमुच्यते। अधिकारी च फलस्वामी एव। उक्तं हि -

**'अधिकारः फलस्वाम्यमिति'** [2]

अत्र नायकेन विश्वामित्रेण किमपि फलं विशेषरूपेण अधिकृतम् न प्रतीयते, प्रत्युत सः देवेन्द्रस्य कूटनीतिं विजानन्नपि शरणागतत्वेन मेनकामङ्गीकृत्य स्वस्य तपसः स्खालित्यमेव करोति। इत्थमत्र नायकस्य फलं किम् इत्यत्र महती जिज्ञासा भवति। गहने विचारे क्रियमाणे इदं प्रतीयते यद् लोकोपकारः एव अत्र अलम्। यद्यपि लोकोपकाररूपं फलम् उपकर्तुः न भवति, तथापि अत्र स्वार्थान् परार्थे एव सम्पादयतः विश्वामित्रसदृशस्य ऋषिप्रवरस्य अपि लोकहितमेव फलमिति मन्तव्यम्। लोकहितञ्च अत्र स्वकीयस्य तपसः भङ्गेन अपि शरणागतायाः मेनकायाः प्रणययाचनास्वीकरणमेकम् अन्यत् प्रमुखं प्रयोजनं भारतभुवः भाविनः स्वामिनः कृते गर्भधारणक्षमक्षेत्रोत्पादनञ्च।

इत्थं लोकोपकाररूपफलस्वाम्यस्य विश्वामित्रे सत्त्वात् इदम् आधिकारिकमितिवृत्तम्।

अस्मिन्नाटके पञ्च पुरुषपात्राणि स्त्रीपात्रद्वितयञ्च सन्ति। इन्द्रः पवनः शार्ङ्गरवः कण्वः विश्वामित्र इति पञ्च पुरुषाः, मेनका माधविका चेति स्त्रीद्वयम्। अस्मिन्नाटके कविना प्राचीनानि पद्यानि सन्दर्भानुगुणं तत्र तत्र निवेशितानि। यथा विश्वामित्रनिकटात् मेनकां स्वर्गम् आगन्तुम् इन्द्रस्य आदेशेन आगता माधविका विक्रमोर्वशीयस्थं श्लोकं वदति -

**मुनिना भरतेन यः प्रयोगो**
**भवतीष्वष्टरसाश्रयो नियुक्तः।**
**ललिताभिनयं तमद्य भर्ता**
**मरुतां द्रष्टुमनाः सलोकपालः॥**[6]

तथा प्रातः उत्थितः कण्वः शार्ङ्गरवम् उद्दिश्य प्रभातवेलां सूचयन् अभिज्ञानशाकुन्तलस्थं पद्यं वदति **'यात्येकतोऽस्तशिखरम्'**[7] इति। एवमेव शिशुं शकुन्तलाम् एकाकिनीं दृष्ट्वा कण्वः शङ्कराचार्यस्य पद्यं वदति -

**करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम्।**
**वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि॥**[8]

अस्मिन्नाटके कदाचित् शृङ्गाररसः, कदाचित् वीररसः प्रधानतया दृश्यते परन्तु पार्यन्तिकः अत्र रसः वीर एव शृङ्गारस्तु गुणीभूत एव। आऽन्तं तस्य कविना अनिरूढत्वात् विश्वामित्रस्य मेनकायां रागाभावस्य वर्णनाच्च तपोनियमभङ्गेनापि धर्मान्तरसन्निपातबुद्ध्या मेनकासम्भोगात् अत्र नायकनिष्ठारतिः धर्मोत्साहे गुणीभूता। मेनकायाः अपि देवेन्द्रनियोगादेव विश्वामित्रसमीपम् आगमनात् पुनः तन्नियोगादेव तत्समीपगमनात् अस्याः रतेः प्रभुनियोगोपसर्जनतया न प्राधान्यम्। अतः अत्र वीररसः एव प्रधानम्।

**सन्दर्भाः**

1. पूर्वशाकुन्तलम् - पूर्वभाष्ये।
2. पूर्वशाकुन्तलम् - पृष्ठसंख्या-2
3. तत्रैव।
4. साहित्यदर्पणम् - तृतीयः परिच्छेदः - कारिका संख्या - 6

5. दशरूपकम् - 1/12 (पृ.-8)

6. विक्रमोर्वशीयम् - 2/18 (पृ.-75)

7. अभिज्ञानशाकुन्तलम् - 4/2

8.. मुकुन्दस्तोत्रम् - (शङ्कराचार्यविरचितम्)

**सन्दर्भग्रन्थसूची**

1. कठोपनिषद् - लेखकः - डॉ.राजेन्द्रप्रसादशर्मा, प्रकाशनम् - राजस्थानविश्वविद्यालय एवं जगदीशसंस्कृतपुस्तकभण्डार, जयपुरम्, वर्षम् - 2006

2. अभिज्ञानशाकुन्तलम्, सम्पादकः - निरूपणविद्यालङ्कारः, प्रकाशनम् - साहित्यभण्डारः, मेरठम्, प्रकाशनवर्षम् - 1962

3. दशरूपकम् - सम्पादकः - प्रो.रामजीलालउपाध्यायः, प्रकाशनम् - भारतीयविद्यासंस्थानम्, वाराणसी, वर्षम् - 2000

4. विक्रमोर्वशीयम् - सम्पादकः - अखण्डानाथझा एवं अखिलेशपाठकः, प्रकाशनम् - प्रकाशनकेन्द्रम्, लखनऊ।

5. पूर्वशाकुन्तलम्, लेखकः - डॉ.हरिरामआचार्यः, हंसाप्रकाशनम्, जयपुरम्, वर्षम् - 2002

6. संस्कृत साहित्य का इतिहास , लेखकः - श्रीरामचन्द्रमिश्रः, प्रकाशनम् - चौखम्बाविद्याभवनम्, वाराणसी, वर्षम् - 2013

7. संस्कृतवाङ्मयकोषः, सम्पादकः - डॉ.भास्करवर्णेकरः, प्रकाशनम् - भारतीयभाषापरिषद्, शेक्सपियरसरणि, कोलकाता, वर्षम् - 1980

8. संस्कृत साहित्य का समीक्षात्मक इतिहास, लेखकः - डॉ.कपिलदेवद्विवेदी, प्रकाशनम् - रामनारायणलाल विजयकुमार, इलाहाबाद, वर्षम् - 2002

9. नाचिकेतकाव्यम् , लेखकः - हरिरामआचार्यः, प्रकाशनम् - लिटरेरीसर्किल, जयपुरम्, वर्षम् - 2008

10. नाट्यशास्त्रम्, लेखकः - प्रो.राधावल्लभत्रिपाठी, प्रकाशनम् - प्रतिभाप्रकाशनम्, दिल्ली, वर्षम् - 1999